National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(62): 13-16
© 2025 NJHSR
www.sanskritarticle.com

**Dr. Malay Debnath**
Assistant Professor,
Department of Sanskrit,
Bankim Sardar College,
Pin – 743329, West Bengal

**Correspondence:**
**Dr. Malay Debnath**
Assistant Professor,
Department of Sanskrit,
Bankim Sardar College,
Pin – 743329, West Bengal

# 'विना गानं नाट्यं रागं न गच्छति' : केषांचित् मञ्चाभिनीतानाम् अर्वाचीनसंस्कृतनाट्यानां परिप्रेक्ष्ये आलोचनम्

**Dr. Malay Debnath**

स्मरणातीतकालात् प्रेक्षकाणां चित्तविनोदनाय अवस्थानुकारात्मकस्य नाट्यस्य रङ्गाभिनयः प्रचलन् अस्ति । अतः नाट्यं प्रयोगविज्ञानम् उच्यते । नाट्यशास्त्रानुसारेण भगवान् पद्मयोनिः नाट्यप्रयोगस्य पूर्णतासम्पादनाय वाद्यकर्मणि सशिष्यं स्वातिं गानकर्मणि च सहचरैः गन्धर्वैः सह नारदं नियोजयामास। नाट्यशास्त्रे रङ्गकर्मणः प्रयोगसंविधानात् एवं ज्ञायते यत्, नाट्यमञ्चनस्य (Stage-craft) अङ्गचतुष्टयं विद्यते । तद्यथा - १. अभिनयः (Acting) २. वाद्यम् (Orchestra) ३. नृत्यम् (Dance) ४. गायनम् (Singing) च। एतेषु अन्तिमत्रयं सामुहिकसंज्ञायां 'सङ्गीतम्' 'तौर्यत्रिकम्' वा उच्यते - "तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम्" (*अमरकोषः*, नाट्यवर्गः, पृ. ७४) इति।

*नाट्यशास्त्रस्य* पञ्चमे अध्याये पूर्वरङ्गविधानस्य आलोचने भरतमुनिना सङ्गीतस्य आलोचनं कृतम्। नेपथ्यसङ्गीतस्य उल्लेखः अपि प्रसङ्गे अस्मिन् वर्णितः -

**"एतानि तु बहिर्गीतान्यन्तर्यवनिकागतैः ।**
**प्रयोक्तृभिः प्रयोज्यानि तन्त्रीभाण्डकृतानि च ।।"** (ना. शा., ५/११)

पुनश्च नाट्ये ध्रुवागानस्य प्रयोगसंविधानम् अपि भरतमुनिना *नाट्यशास्त्रस्य* द्वात्रिंशे अध्याये वर्णितम्। नाट्यवस्तु नाट्यचरितानि रसभावदेशकालावस्थादीन् च विचार्य नाट्ये ध्रुवागानस्य अपि प्रयोगः कर्तव्य। यथोक्तं *नाट्यशास्त्रे* -

**वस्तु प्रयोगं प्रकृतिं रसभावमृतुं वयः ।**
**देशं कालामवस्थां च ज्ञात्वा योज्या ध्रुवा बुधैः ।।** (ना. शा., ३२/४००)

नाट्ये नेपत्थसंगीतं भवतु मञ्चोपरि प्रयुक्तं संगीतं वा भवतु - नाट्यानां प्रयोगतत्त्वे उभयविधयोः संगीतयोः गुरुत्वमस्ति।

नाट्ये गीतप्रयोगमूलकं संविधानं यथा विक्रमोर्वशीयादीषु प्राचीनसंस्कृतनाट्येषु दृश्यते तथा आधुनिकेषु संस्कृतनाट्येषु अपि दरीदृश्यते । संदर्भस्यास्य स्वल्पे परिसरे श्रीजीवन्यायतीर्थ-विश्वेश्वरविद्याभूषण-हरिदाससिद्धान्तवागीश-कालीपदतर्काचार्य-सिद्धेश्वरचट्टोपाध्याय-प्रमुखानां वङ्गदेशीयानाम् अर्वाचीन-संस्कृतकवीनां नाट्ये संगीतस्य नाट्यशास्त्रानुसारं प्रयोगसंविधानम् आलोचयिष्यामः।

**श्रीजीवन्यायतीर्थस्य नाट्ये गीतस्य प्रयोगः**

श्रीजीवन्यायतीर्थस्य *रागविरागम्* नाम प्रहसनस्य इतिवृत्तं संगीतकेन्द्रिकमासीत्। संगीतविद्वेषी क्रूढो राजा कथं संगीतं प्रति अनुरक्तः अभवत्, संगीतं श्रुत्वा यतिधर्मोन्मार्गी संसारेच्छुः यतिः कथं सन्न्यासाय पुनः उत्सुकः अभवत्, कथं संगीतश्रवणेन नृपं गुप्तहत्यया लोकान्तरं प्रेषयितुकामस्य राजकुमारस्य हत्याभिलाषः निवर्तितः जातः, मन्त्रिपुत्रेण सह प्रणयासक्तायाः देशान्तरगन्तुकामायाः राजकन्यायाः संगीतश्रवणेन कथं मनसि धैर्यम् उत्पादितम् इति वृत्तं वर्णितम् अस्मिन् प्रहसने –

**"सखि भज धैर्यमिदानीं**
**शोचसि विगतां किमु रजनीम्।**
**अतनुं ननु तनु पुनरपि यत्नं**
**सहसा न त्यज निजधृतिरत्नं**
**स्मर धृतिमूर्तिभवानीम्।**
**काममात्रमिह यावत्तनुषे**
**तावन्न मनोरथमधिकुरुषे**
**शोधय हृदयम्लानिम्।**
**सकलशुभालय - धैर्यं पालय**
**शृणु मम मङ्गलवाणीम्।।"**[१]

अस्य प्रहसनस्य अन्तिमे राजा स्वीयापराधम् अवगम्य विदूषकम् उवाच - **"मयैव घासचर्वणं कर्तुमुचितम्"**[२] इति। सर्वेषां पुरतः राज्ञः खेदोक्तिः इयं प्रसिद्धम् एकं सुभासितं स्मारयति -

**"साहित्यसंगीतकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः।**
**तृणं न खादन्नपि जीवमानः तद्भागधेयं परमं पशूनाम्।।"**
(सुभाषितम्)

श्रीजीवन्यायतीर्थस्य *साम्यसागरकल्लोलम्* इति नाटके बहुषु गीतेषु गणसैनिकैः परिवेशितं गीतं समग्रविश्वस्य श्रमजीविनां कृषकाणां श्रमिकाणाम् ऐक्यबद्धविप्लवं साम्यवादं च अनुप्रयति–

**"जय जय विप्लव जय विद्रोह**
**लुप्यतु भारत जनगणमोह**
**श्रमिकजनानां कुरु संघटनम्**
**कर्षक हर्षकपरभूहननम्**
**मारय धनिनः करधृतलोहः।।"**[३]

गीतमिदं नाट्यवस्त्वनुसारि अङ्गीभूतस्य वीररसस्य परिपोषकं च वर्तते।

श्रीजीवस्य *वनभोजनम्* इति प्रहसने कस्यचित् विद्यालयस्य षट्सु छात्रेषु सुप्रिय-देवप्रिय-नामकौ द्वौ छात्रौ उदरे हस्तं संस्थाप्य यद् गीतं गायन्तौ आस्तां, तद् गीतं प्रहसनस्य वस्तु-नेतृ-रसभावानुसारं समीचीनं प्रयुक्तम् –

**"उदर त्वमहो परमं ब्रह्म**
**प्रेयः श्रेयः साधनरम्यः**
**दानव-मानव-कीट-पतङ्गान्**
**किन्नरगणशुभ-निर्जरसंख्यान्**
**व्यापृणुषे वपुरन्तरगम्य**
**त्वयि मतिरास्तामयि जनस्य**
**चर्ममयत्वं कर्म विशालम्**
**तनुषे नन्दित जीवनकालम्**
**प्राणरसायन महिमस्तम्भ**
**प्रिय जयजित गिरिह्वर दम्भ।"**[४]

**विश्वेश्वरविद्याभूषणस्य नाट्ये गीतस्य प्रयोगः**

विश्वेश्वरविद्याभूषणस्य *चाणक्यविजयम्* (१९५५, प्रणवपारिजातः) सप्ताङ्कविशिष्टं वीररसात्मकं च नाटकम्। अस्मिन् नाटके यद्यपि चाणक्यस्य कूटनीतेः तथा युद्धस्य वर्णनमस्ति तथापि गीतवीणावाद्यैः रसान्तरस्य प्रयोगेण प्रेक्षकाणां चित्रविनोदनम् अत्र विहितम्। अस्य नाटकस्य प्रथमाङ्कस्य तृतीये दृश्ये नेपथ्यसंगीतम् अत्र उल्लेखनीयम् –

**"शान्तिसुधानिर्झरिणी**
**क्व नु विद्यते पुर्यप्रवाहिणी**
**तापदग्धमन्तरम्**
**क्रन्दसि शून्यं निरन्तरम्**
**न जाने किं प्रवहति सुखशीतलमन्दाकिनी**
**शान्तिकरुणावर्षिणी।।"**[५]

*उत्तरकुरुक्षेत्रम्* (१९६८ ख्री.) नाम नाटके संगीतस्य बहुलप्रयोगो दृश्यते। पुरलक्ष्म्याः संगीते नारदस्य संगीते यादवानां संगीते च पदलालित्यं भाषासारल्यं तदनुकूलच्छन्दसां प्रयोगः च दृश्यन्ते। अस्य नाटकस्य द्वितीये दृश्ये यादवानाम् आनन्दसमुत्थं गीतम् अतिमनोहरं विद्यते –

**"कुरुत कुरुत सुखगानम्**
**नृत्यकेलिपरा कुरुत मधुपानम्।**
प्रथमयादवः – अयमेति मधुमासः,
द्वितीययादवः – विकशतु मुखहासः
तृतीययादवः – स्फुरति हृदये मुहु रसविलासः
सर्वे – अधरे अधरे, नयने नयने कुरुत सुधादानम्,
**आनन्दनिर्भरस्नानम्।।"**[६]
**गीतमिदं प्रावेशिकीध्रुवाया**[७] उदाहरणम्।

अस्य नाटकस्य द्वितीयाङ्कस्य तृतीये दृश्ये नेपथ्ये पुरलक्ष्मी गायति विषादगीतम् –

**"अन्धकारे शून्यपुरे ध्वनति दुःखवीणा,**
**क्रन्दति मौनं जनहीना नगरी विषाददीना।**
**शोचन्ति जना हा केशवेति**
**यदुनाथ कृष्ण यादवेति**
**गर्जति मत्तः प्रलयसिन्धुर्दिग्बधूः शोकलीना।।**
**प्रसरति घोरतिमिरः पुरः आलोकहरणकारी,**
**मज्जति पुरी अतललीना नास्ति तिमिरहारी,**
**नीरवा विहगकण्ठगीतिः**
**स्तब्धा शङ्खनादस्तुतिः**
**न चरति पुरकामिनीगणो वसुधा प्राणहीना।**
**क्रन्दति मधुवीणा।।"**[८]

विश्वेश्वरविद्याभूषणस्य *प्रबुद्धहिमाचलम् वाल्मीकिसंबर्धनम्* चेति नाटकद्वये अपि गीतानां संयोजनम् अतिमनोहरम्।

**हरिदाससिद्धान्तवागीशस्य नाट्ये गीतस्य प्रयोगः**

हरिदाससिद्धान्तवागीशस्य *शिवाजीचरितम्* नाम नाटकस्य प्रथमाङ्कस्य अन्तिमे शिवानन्दसिंहस्य सहचराः शिवानन्दं प्रदक्षिणीकुर्वन्तो गायन्ति –

"बालको युवकः प्रौढो वृद्धः,
मनसा वचसा वपुषा शुद्धः।
भवतु त्वरितमेकताबद्धः
देशोद्धारे मास्तु विरुद्धः ।।
धर धर प्रहरणम्, चल चल महारणम्
कुरु भारतोद्धरणं न भव कोऽपि विरुद्धः।
इह बहुगुण आर्यः न हि यवननिवार्यः,
भवामि कृतकार्यः परमपि सुसमृद्धः ।।"[९]

वीररसात्मकम् इदं गीतं नैष्क्रामिकीध्रुवायाः[१०] उदाहरणमेकम् । *वङ्गीयप्रतापम्* नाम नाटकस्य प्रथमाङ्कस्य प्रस्तावनायां नेपथ्य-संगीतं यत् प्रस्तुतं तत् प्रेक्षकचित्ते स्वदेशप्रेम प्रबलीकरोति –

"हे सन्तान तव जननी
धनजनसमन्विता केन अनाथिनी ।।
परमुखे दृष्टिकरी परद्वारे भिक्षाकरी
यथा दीनहीननारी जीविता विषादिनी ।।
अतिनिद्रापरायण- निरुद्यमपुत्रगण
आलस्यवशजीवन आकुला गौरविनी ।।"[११]

अस्य नाटकस्य तृतीयाङ्कस्य प्राक् विष्कम्भके यमुनातरङ्गान्दोलितनौकायां धीवराणां समवेतप्राकृतगीतं तेषां दैनन्दिनजीवन-संग्रामं प्रकटयति –

"अले ......... आआसे वहह वाशा, भासइ मेहा, दीसइ भङ्गओ।
तूणं तूणं वाहेहि वाहेहि सअलाआ णाआआ।
तोलेहि जालं चालेहि पालं
ण क्खिव कालं जाणा णाओ हो।
पाउ ण मच्छो लोटइ वच्छो
अन्दिए कच्छो दूले गिहाओ ।"[१२]

(संस्कृतानुवादः – "अरे .... आकाशे वहति वातः, भासते मेघः, दृश्यते भङ्गः।
तूर्णं तूर्णं वाहय वाहय, सकला नौकाः।
तोलय जालं चालय पारं
न क्षिप कालं जीर्णा नौकाः।
प्राप्तो न मत्स्यः रोदिति वत्सः
अन्तिके कच्छः, दूरे गृहाः ।।"
— हरिदाससिद्धान्तवागीशकृतः)

प्रसङ्गे अस्मिन् उल्लिख्यते यत् हरिदाससिद्धान्तवागीशस्य *मिवारप्रतापम्* इति नाटकस्य प्रथमाङ्के अपि सशस्त्रक्षेपं कुर्वन्तः नृत्यन्तः भिल्लसैनिकाः गायन्ति प्राकृतगीतम् —

"महु महु महुरं सीहु सीहु णिअरं पिउ पिउ चउरं वीर ।
लहु लहु चरणं बहु बहु करणं संहर जवणं धीर ।।
करेहि जीवणपणं धरेहि णु पहरणं ।
मारेहि जवणगणं पत्थरसमसरीर ।।"[१३]

(संस्कृतानुवादः - "मधु मधु मधुरं सीधु सीधु निकरं पिव पिव चतुरं वीर ।
लघु लघु चरणं बहु बहु करणं संहर यवनं धीर ।।
कुरु जीवनपणं धर तु प्रहरणम्
मारय यवनगणं प्रस्तरसमशरीरः ।।"
— हरिदाससिद्धान्तवागीशकृतः)

**कालीपदतर्काचार्यस्य नाट्ये गीतस्य प्रयोगः**

कलिकातास्थितायां संस्कृतसाहित्यपरिषदि मञ्चस्थस्य कालीपदतर्काचार्यकृतस्य *माणवकगौरवम्* नाम नाटकस्य द्वितीयाङ्कस्य द्वितीये दृश्ये किरातबालकस्य प्राकृतसंगीतं प्रयुक्तम्। प्रसङ्गेऽस्मिन् उल्लेखार्हं यत् नाट्यशास्त्रे गीतस्य भाषाविषये विशेषः नियमः नास्ति। लोकरुच्यनुसारेण गीते भाषाविधानं कर्तव्यम् इति अस्मात् नियमशैथिल्यात् प्रतीयते। अस्य नाटकस्य द्वितीये चतुर्थे च अङ्के विवेकस्य संगीतं विद्यते। विवेकः वस्तुतः उचितानुचितकर्मनिर्णायकः चित्रवृत्तिविशेषः। स च अस्मिन् रूपके पात्ररूपेण मञ्चे समुपस्थितः। इदानीं यात्रापालायाम् अपि विवेकगीतं प्रयुज्यते। भक्तिरसाश्रिते अस्मिन् रूपके भक्तिमूलकानि विवेकगीतानि अङ्गीरसं परिपुष्णान्ति।

कालीपदतर्काचार्यस्य *नलदमयन्तीयम्* नाम नाटके विवेकचरित्रेण साकं मोहः कलिः कामः धर्मः च इत्यादीनि रूपकाश्रितानि चरित्राणि दृश्यन्ते। तृतीयाङ्कात् विवेकगीतमेकम् उल्लिख्यते –

**"कलिरतिखलतां जनयति हृदि तव**
**कुरुते हतमिव सुकृतवितानम् ।**
**चेतय हृदयं पालय विनयं**
**पुण्यसरणिमनुकुरु पददानम् ।**
**सितकरकुलधर खलतां परिहर**
**नलकृतिमनुसर वह बहुमानम् ।**
**धनजनसदनं संसृतिगहनं**
**न खलु चिरं कुरु चिरमवधानम् ।।"**[१४]

अस्मिन् नाटके मोहचरित्रेण अपि गीतं[१५] परिवेशितम् ।

**सिद्धेश्वरचट्टोपाध्यायस्य नाट्ये गीतस्य प्रयोगः**

'बुडोदा' इति उपनामधेयस्य सिद्धेश्वर-चट्टोपाध्यायस्य *ननाविताडनम्* नाम्नो नाटकस्य प्रारम्भे सूत्रधारो लौकिकताललयेन गीतं प्रस्तौति –

**"शृणु शृणु समागत सर्वगुणिजन ।**
**अधिकारिगीतेऽधुना दीयतां हि मनः।।**
**नानावृत्तं समालम्ब्य निवेद्यते मया ।**
**सरसकटुका कथा हीन-ताल-लया ।।**

(अहो हीनताललया)

**अस्ति तत्र ननानाम्नी देवी महीयसी ।**
**सर्वजनवन्द्या सा हि माता गरीयसी ।।**

**पूरवी कन्यका तस्या वङ्गदेशे जाता।**
**उत्तरापि सुता तस्यास्तत्र समायाता।**
**काले तत्र समागता विदेशिनी कन्या।**
(अहो विदेशिनी कन्या)

**रूपयौवनवती सा सर्वजनमान्या॥"**[१६]

सत्यम् इदं यत् अनेन एव गीतेन अस्य नाट्यस्य पात्रपात्रीपरिचयः तथा इतिवृत्तस्य ज्ञानं सुधिभिः लभ्यते।

**उपसंहारः**

प्रस्तुतात् अस्मात् संदर्भात् इदम् अवगम्यते यत् नाट्यानां प्रयोगतत्त्वे संगीतस्य गुरुत्वपूर्णा भूमिका अस्ति। मञ्चे पात्रप्रवेशे निष्क्रमणे भावाभिव्यक्तौ रसानां परिपोषणे विशेषतया सामाजिक-मनोरञ्जनाय च नाट्ये संगीतम् अवश्यम् एव प्रयोक्तव्यम्। यथार्थम् उक्तं *नाट्यशास्त्रे* भरतेन —

**"गीतप्रयत्नः प्रथमं तु कार्यः**
**रम्यां हि नाट्यस्य वदन्ति गीतम्।**
**गीते च वाद्ये च हि संप्रयुक्ते**
**नाट्यप्रयोगो न विपत्तिमेति॥"** (ना. शा., ३२.४९३)

उदाहरणमुखेन नाट्ये गीतस्य उपरि गुरुत्वम् आरोप्य भरतपादैः सुष्ठु भणितम् –

**"यथा वर्णादृते चित्रं शोभते न निवेशनम्।**
**एवमेव विना गानं नाट्यं रागं न गच्छति॥"**
(ना. शा., ३२.४८२)

**तथ्यसूत्राणि**

१. श्रीजीवन्यायतीर्थः। *रागविरागम्*। संस्कृतसाहित्यपरिषत्पत्रिका। Vol. XIV, पृ. १०५
२. तदेव, पृ. १०८
३. श्रीजीवन्यायतीर्थः। *साम्यसागरकल्लोलम्*। प्रणवपारिजात-पत्रिका (द्वादश – त्रयोदशवर्षम्)। पृ. २७
४. श्रीजीवन्यायतीर्थः। *वनभोजनम्*। प्रणवपारिजातपत्रिका (चतुर्थ-वर्षम्)। पृ. १७
५. विश्वेश्वरविद्याभूषणः। *चाणक्यविजयम्*। प्रथमोऽङ्कः, तृतीय-दृश्यम्, पृ.११-१२
६. विश्वेश्वरविद्याभूषणः। *उत्तरकुरुक्षेत्रम्*। द्वितीयोऽङ्कः, प्रथम-दृश्यम्, पृ. १९
७. नानार्थरसार्थयुक्ता नृणां या गीयते प्रवेशेषु।
प्रावेशिकी तु नाम्ना विज्ञेया सा ध्रुवा तज्ज्ञैः॥ (ना.शा. ३२.३६५)
८. विश्वेश्वरविद्याभूषणः। *उत्तरकुरुक्षेत्रम्*। द्वितीयोऽङ्कः, तृतीय-दृश्यम्, पृ. २१
९. हरिदाससिद्धान्तवागीशः। *शिवाजीचरितम्*। १३६२ वङ्गाब्दः। पृ. १४
१०. अङ्कान्ते निष्क्रमणे पात्राणां नीयते प्रयोगेषु।
निष्क्रामोपगतगुणां विद्यान्नैष्क्रामिकीं तां तु॥
(ना.शा., ३२.३६६)
११. हरिदाससिद्धान्तवागीशः। *वङ्गीयप्रतापम्*। १३५२ वङ्गाब्दः। कलिकाता, पृ. ४
१२. तदेव। पृ. ३२
१३. हरिदाससिद्धान्तवागीशः। *मिवारप्रतापम्*। १३५२ वङ्गाब्दः। कलिकाता, पृ. १५
१४. कालीपद-तर्काचार्यः। *नलदमयन्तीयम्*। तृतीयाङ्कः, पृ. ६३
१५. तदेव। चतुर्थोऽङ्कः, पृ. ८३
१६. सिद्धेश्वर-चट्टोपाध्यायः। *ननाविताडनम्*। पृ. ११-१२

**अनुशीलिता ग्रन्थाः**


कालीपदतर्काचार्य। *माणवकगौरवम्*। कलिकाता : संस्कृतसाहित्य-परिषत्पत्रिका,१९५८ बङ्गाब्द। (संस्कृतसाहित्यपरिषत् सिरिज् नं - २७)

कालीपदतर्काचार्य। *नलदमयन्तीयम्*। कलिकाता : संस्कृतसाहित्य-परिषत्पत्रिका, १३३२ बङ्गाब्द। (संस्कृतसाहित्यपरिषत्-ग्रन्थमालायां चतुर्दशसंयख्या)

भरत। *नाट्यशास्त्रम्* ('अभिनवभारती' टीकोपेतम्)। संपा. आर.एस्. नागर। चतुर्थखण्डम्। दिल्ली : परिमल पावलिकेशनस्, २००४ (परिमार्जित-संस्करणम्)

विश्वेश्वरविद्याभूषण। *उत्तरकुरुक्षेत्रम्*। दत्तपुकुर, उत्तर चव्विश परगणा (पश्चिमवङ्ग) : ऋषिधाम, १९६८ ईशवीये (प्रथमप्रकाश)।

विश्वेश्वरविद्याभूषण। *चाणक्यविजयम्*। दत्तपुकुर, उत्तर चव्विश परगणा (पश्चिमवङ्ग) : ऋषिधाम, १९६६ ईशवीये (प्रथमप्रकाश)।

विश्वेश्वरविद्याभूषण। *प्रबुद्धहिमाचलम्*। दत्तपुकुर, उत्तर चव्विश परगणा (पश्चिमवङ्ग) : ऋषिधाम, १९६६ ईशवीये (प्रथमप्रकाश)।

श्रीजीवन्यायतीर्थ। *रागविरागम्*। कलिकाता : संस्कृतसाहित्य-परिषत्पत्रिका, Vol. LXXXIX संख्या १-४, मार्च २००७

श्रीजीवन्यायतीर्थ। *वनभोजनम्*। कलिकाता : प्रणवपारिजातपत्रिका (चतुर्थवर्षम्)। १९६२ ईशवीये (प्रथमप्रकाश)।

श्रीजीवन्यायतीर्थ। *साम्यसागरकल्लोलम्*। कलिकाता : प्रणवपारिजात-पत्रिका (द्वादश-त्रयोदशवर्षम्)। १९५९ ईशवीये (प्रथमप्रकाश)।

सिद्धेश्वर-चट्टोपाध्याय। *ननाविताडनम्*। कलिकाता : संस्कृतसाहित्य-परिषत्पत्रिका, Vol. LVII. १९७४ ईशवीये।

हरिदाससिद्धान्तवागीश। *मिवारप्रतापम्*। कलिकाता : सिद्धान्तविद्यालय, १३५२ वङ्गाब्द (प्रथमप्रकाश)।

हरिदाससिद्धान्तवागीश। *वङ्गीयप्रतापम्*। कलिकाता : सिद्धान्त-विद्यालय, १३५२ वङ्गाब्द (प्रथमप्रकाश)।

हरिदाससिद्धान्तवागीश। *शिवाजीचरितम्*। कलिकाता : सिद्धान्त-विद्यालय, १३६१ वङ्गाब्द (प्रथमप्रकाश)।